ख्यातेर्यलोपः समानस्य सभावश्च सख्यूङ्गामिति सिद्धौ। इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः। आक्रन्दः २ मित्रम् ३ सुहृत् ४। इति जटाधरः ॥ वयस्यः ५ सवयाः ३ स्निग्धः ७ सहचरः ८। इति हेमचन्द्रः ॥ (यथा माघे। २। ३६।
"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः
स्यातामभिवौ मित्रे च सहजप्राकृतावपि ॥")
सहायः। इति मेदिनी ॥ तत्पत्नीगमने दोषो यथा,—
"गुरुतल्पव्रतं कुर्य्यात् रेतः सिक्त्वा स्वयोनिषु।
सख्युः पुत्त्रस्य च स्त्रोषु कुमारीष्वन्त्यजासु च ॥"
इति प्रायश्चित्ततत्त्वम् ॥

सखिता, स्त्री, (सख्युर्भावः। सखि+तल्।) सख्यम्। यथा,—
"मीमांसे बहुसेवितासि सुहृदस्तर्काः समस्ताः स्थ मे
वेदान्ताः परमात्मबोधगुरवो यूयं मयोपासिताः
जाता व्याकरणाति बालसखिता युष्माभिरभ्यर्थये
प्राप्तोऽयं समयो मनूक्तविहतो साहाय्यमालम्ब्यताम् ॥"
इति मनुटीकायां कुल्लूकभट्टः ॥

सखित्वं, क्ली, (सख्युर्भावः। सखि+त्व।) सख्यम्। (यथा, महाभारते। १। १३७। १५।
"कृतं सर्व्वेण मेऽन्येन सखित्वन्तु त्वया वृणे।
द्वन्द्वयुद्धञ्च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो ! ॥")

सखी, स्त्री, ("सख्यशिश्वीति भाषायाम्।" ४। १। ६२। इति ङीष्।) सहचरी। तत्पर्य्यायः। आलिः २ वयस्या ३। इत्यमरः। सध्रीची ४। इति हेमचन्द्रः ॥ (यथा, रघुः। ३।
"अथेप्सितं भर्त्तुरुपस्थितोदयं
सखीजनोद्वीक्षणकौमुदीमुखम्।
निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौर्हृदलक्षणं दधौ ॥")

सख्यं, क्ली, (सख्युर्भावः कर्म्म वा। सखि+यत्।) मित्रता। तत्पर्य्यायः। सौहृदम् २ सौहार्दम् ३ साप्तपदीनम् ४ मैत्रम् ५ जर्य्यम् ६ सङ्गतम् ७। इति हेमचन्द्रः ॥ (यथा, रघुः। १२। ५७।
"वधनिर्धूतशापस्य कबन्धस्योपदेशतः।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ ॥")

सग, स ए संवृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) स, स्थगयिषति। ए, असगीत्। इति दुर्गादासः ॥

सगन्धः, पुं, (गन्धेन सह वर्त्तमान इति।) ज्ञातिः। इति त्रिकाण्डशेषः ॥ गन्धयुक्ते, त्रि ॥ (यथा, बृहत्संहितायाम्। ४३। ३६।
"द्विरदमदमहीसरोजलाजै-
र्घृतमधुना च हुताशनं सगन्धे ॥")

सगरः, पुं, (गरेण सह वर्त्तमानः।) अर्हद्भेदः। इति हेमचन्द्रः ॥ सूर्य्यवंशीयराजविशेषः। स तु अयोध्याधिपतिबाहुराजपुत्त्रः तस्योत्पत्त्यादि यथा,—
"सूर्य्यवंशे महाराजो बाहुर्नाम महानभूत्।
तस्य राज्यं हृतं सर्व्वं हैहयैस्तालजङ्घकैः ॥
काम्बोजाः पह्लवाश्चैव पारदा यवनाः शकाः।
एते पञ्चगणा ब्रह्मन् हैहयार्थे पराक्रमन् ॥
हृतराज्यः स वै विप्र तदा बाहुर्व्वनं ययौ।
पत्नी तु यादवी तस्य गुर्व्विण्यासीत् पतिव्रता ॥
तत्सपत्नी पूर्व्वमेव तस्या गर्भजिघांसया।
भोजनेन सह प्रादात् गरं धर्म्मानवेक्षया ॥
यादव्यास्तु तपोयोगात् गर्भो नैव ममार ह।
न ममार च सा राज्ञी देवानामनुकम्पया ॥
पतिं सानुययौ साध्वी सिषेवे तं वने सदा !
स राजा विपिने तस्मिन् प्राणांस्तत्याज योगवान् ॥
सा तु भर्त्तुश्चितिं कृत्वा वने तामध्यरोहत।
और्व्वस्तां भार्गवस्तात कारुण्यात् समवारयत्॥
तस्याश्रमे च सा गर्भं सुषुवे ज्वलनप्रभम्।
व्यजायत महाबाहुर्गरेणैव सह द्विज ॥
सगरो नाम तेनाभूत् बालकोऽतिमनोहरः।
और्व्वस्तु जातकर्म्मादि तस्य कृत्वा महात्मनः ॥
अध्याप्य वेदानखिलान् शस्त्राणि प्रत्यपादयत्।
आग्नेयन्तु महाघोरममरैरपि दुःसहम् ॥
स तेनास्त्रबलेनाजौ बलेन च समन्वितः !
हैहयांस्तालजङ्घांश्च जघ्ने रुद्रः पशूनिव ॥
जनयामास लोकेऽस्मिन् कीर्त्तिं कीर्त्तिमतांवरः
ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा।
पह्लवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः ॥
ते हन्यमाना वीरेण सगरेण महौजसा।
वशिष्ठं शरणं जग्मुः सूर्य्यवंशपुरोहितम् ॥
वशिष्ठः शरणापन्नान् समये स्थाप्य तान्नृपः।
सगरं वारयामास तेभ्यो दत्त्वाभयं तदा ॥
सगरस्तां प्रतिज्ञान्तु निशम्य सुमहाबलः।
धर्म्मं जघान तेषाञ्च वेशानन्यांश्चकार ह ॥
अर्द्धं शिरः शकानान्तु मुण्डयामास भूपतिः।
यवनानां शिरः सर्व्वं काम्बोजानामपि द्विज ॥
पारदान् मुक्तकेशांस्तु पह्लवान् श्मश्रुधारिणः।
निःस्वाध्यायवषट्कारान् सर्व्वानेव चकार ह ॥
कालसर्पा माहिषका दार्व्वाश्चोला: सकेरलाः
खसास्तुषाराश्चानाश्च मद्राः किष्किन्धकास्तथा।
कौन्तलाश्च तथा बङ्गाः शाल्वाः कौङ्कणकास्तथा।
सर्व्वे ते क्षत्त्रियास्तात धर्म्मास्तेषां निराकृताः॥
पुरोहितस्य वाक्येन कृता विकृतवेशिनः।
वशे कृत्य सराजन्यान् स्वराज्यमन्वशासत ॥"
इति पाद्मे स्वर्गखण्डे १५ अध्यायः ॥ * ॥
अपि च।
"रोहिताच्च हरितो जातो हरिताद्बाहुरजायत ॥
सगरस्तस्य पुत्त्रोऽभूत् राजा परमधार्म्मिकः ॥
द्वे भार्य्ये सगरस्यापि प्रभा भानुमती तथा।
ताभ्यामाराधितः पूर्व्वमौर्व्वोऽग्निः पुत्त्रकाम्यया।
और्व्वस्तुष्टस्तयोः प्रादात् यथेष्टं वरमुत्तमम्।
एका षष्टिसहस्राणि सुतमेकं तथा परा ॥
गृह्णातु वंशकर्त्तारं प्रभा गृह्णाद्बहूंस्तथा।
एकं भानुमती पुत्त्रमगृह्णादसमञ्जसम् ॥
ततः षष्टिसहस्राणि सुषुवे यादवी प्रभा।
खनन्तः पृथिवीं दग्धा विष्णुना येऽश्वमार्गणे ॥
असमञ्जसस्तु तनयः अंशुमान् नाम विश्रुतः।
तस्य पुत्त्रो दिलीपस्तु दिलीपात्तु भगीरथः ॥
येन भागीरथी गङ्गा तपः कृत्वावतारिता।
भगीरथस्य तनयो नाभाग इति विश्रुतः ॥"
इति मात्स्ये १२ अध्यायः ॥

सगर्भः, पुं, (समानो गर्भो यस्य। समानस्य सः।) सहोदरः। इति शब्दरत्नावली ॥ त्रि, अभ्यन्तरितसूक्ष्मपत्रादियुक्तः। यथा—
"दर्भान् सगर्भानादाय नव सप्त च पञ्च वा।
साग्रान् समूलानच्छिन्नान् द्विजो दक्षिणपाणिना।
अन्वारब्धेन सव्येन तर्पयेत् षड्विनायकान् ॥"
इति काशीखण्डे सदाचारो नाम ३५ अध्यायः॥ (गर्भविशिष्टे च त्रि। यथा कथासरित्सागरे। २०। ८४।
"अनलोऽपि सगर्भोऽभूत् तेन वीर्य्येण धूर्जटेः ॥")

सगर्भा, स्त्री, (गर्भेण सह वर्त्तमाना।) गर्भवती। यथा—
"केचिद्गहनमाश्रित्य केचित् पातालमाविशन्।
सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ॥"
इति पाद्मे सृष्टिखण्डे १ अध्यायः ॥
सहोदरा। इति सगर्भशब्ददर्शनात् ॥

सगर्भ्यः, पुं, (समाने गर्भे भवः। "सगर्भसयूथसनुतात् यन्।" ४। ४। ११४। इति यन्।) सहोदरः। इत्यमरः ॥ (यथा, वाजसनेयसंहितायाम्। ४। २०।
"अनु त्वा माता मन्यतामनु पितानु भ्राता
सगर्भ्योऽनु सखा सयूथ्यः ॥")

सगोत्रं, क्ली, (समानं गोत्रमिति। समानस्य सः।) कुलम्। यथा,—
"कुलं गोत्रं सगोत्रञ्च तुल्यगोत्रे निगद्यते।"
इति शब्दरत्नावली ॥

सगोत्रः, पुं, (समानं गोत्रमस्य। "ज्योतिर्जनपदरात्रीति।" ६। ३। ८५। इति समानस्य सः।) ज्ञातिः। यथा,—
"सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥"
इत्यमरः ॥
(यथा, मनुः। ९। १९०।
"संस्थितस्यानपत्यस्य सगोत्रात् पुत्त्रमाहरेत्॥")

सग्धिः, स्त्री, सहभोजनम्। इत्यमरः ॥ समाना सह वा जग्धिः सग्धिः। अदः क्तिः जग्धाऽदो इति जग्ध जग्धिः निपातनात् सग्धिरादेशः। सग्धिरपि छन्दसीति परे। इत्यमरटीकायां भरतः ॥

सघ, न हिंसे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) न, सघ्नोति। असासघत्। इति दुर्गादासः ॥